ॐ तत्सद्ब्रह्मणे नमः ।

योगशिखोपनिषत् ।

नारायणविरचितदीपिकासमेता ।

योगमूर्धप्रतिष्ठेयमुक्ता योगशिखा ततः ।
त्रिखण्डा ग्रन्थसंदोहे द्वाविंशतितमा मता ॥ १ ॥
यद्वा वह्निशिखाध्यानयोगाद्योगशिखा मता ।
साङ्गोपाङ्गो योग उक्तस्तथा तत्साधनानि च ॥ २ ॥

संप्रति देहान्ते योगिनो गमनप्रकारो वक्तव्य एतदर्थं योगशिखाऽऽरभ्यते—

ॐ योगशिखां प्रवक्ष्यामि सर्वज्ञानेषु चोत्तमाम् ।
यदा तु ध्यायते मन्त्रं गात्रकम्पोऽभिजायते ॥ १ ॥
आसनं पद्मकं बद्ध्वा यच्चान्यद्वाऽपि रोचते ।
कुर्याच्चासाग्रदृष्टिं च हस्तौ पादौ च संयतौ[1] ॥ २ ॥
मनः सर्वत्र संयम्य ओंकारं तत्र चिन्तयेत् ।
ध्यायेत सततं प्राज्ञो हृत्कृत्वा परमेष्ठिनम् ॥ ३ ॥
एकस्तम्भे नवद्वारे त्रिस्थूणे पञ्चदैवते ।
ईदृशे तु शरीरे वा मतिमानुपलक्षयेत् ॥ ४ ॥

ॐ योगशिखामिति । मन्त्रं प्रणवम् । गात्रकम्पः श्रद्धातिशयसूचकः । यद्वा कम्पो भवति मध्यम इतिवचनाद्यदा मध्यमः प्राणविजयो भवति तदाऽऽसनं बद्ध्वा । अन्यत्सिद्धादि । संयतौ कुर्यान्महाबन्धाभ्यासेन । सर्वत्र वर्तमानं सदिति शेषः । हृद्धृदि । परमेष्ठिनं कमलासनम् " परमेष्ठी पितामहः " इति कोशात् । एकमूर्तित्वाद्धरिहरवत्परमेष्ठिध्यानमपि मुक्तिहेतुः । अग्निर्वा परमेष्ठी । एकस्तम्भः एकः स्तम्भः सुषुम्नाश्रयो मुण्डाधारदण्डः क्रोडाख्यो यस्य तत्तस्मिन् । इडापिङ्गलासुषुम्नास्तिस्रः स्थूणा यस्मिंस्तस्मिंस्त्रिस्थूणे त्रिगुणात्मके वा । पञ्च चेन्द्रियाधिष्ठात्र्यो देवता एव दैवतानि प्राणादयो वा यत्र तस्मिन्पञ्चदैवते । शरीरे वेति । हृदपेक्षो विकल्पः ॥ १ ॥ ॥ २ ॥ ३ ॥ ४ ॥

---

१ क. ङ. संयुतौ ।

हृदि ध्यानप्रकारमाह—

आदित्यमण्डलं दिव्यं रश्मिज्वालासमाकुलम् ।

आदित्येति । दिव्यमादित्यमण्डलम् । रश्मीनां किरणानां ज्वालाभिः समाकुलम् । अनेन चन्द्रोऽप्युक्तो द्रष्टव्यः । तस्मिन्सूर्येन्दुपावकानित्युक्तत्वात् ।

वह्निमेव ध्येयतया निर्दिशति—

तस्य मध्ये गतो वह्निः प्रज्वलेद्दीपवर्तिवत् ॥ ५ ॥

इति प्रथमः खण्डः ॥ १ ॥

तस्येति । तस्याऽऽदित्यस्य मध्ये गतः प्रविष्टो वह्निर्दीपवर्तिवत्प्रज्वलेत्प्रज्वलति॥५॥

इति प्रथमः खण्डः ॥ १ ॥

दीपशिखायां या मात्रा सा मात्रा परमेष्ठिनः ॥ १ ॥

मात्रा परिमाणम् । सा परमेष्ठिनो ब्रह्मणो वह्नेर्वा देहाधिष्ठातुर्मात्रा । इदं वह्नेर्ध्यानं याज्ञवल्क्येनोक्तम्—

तद्यथा—" हृत्सरोरुहमध्येऽस्मिन्प्रकृत्यात्मककर्णिके ।
अष्टैश्वर्यदलोपेते विकारकेसरैर्युते ॥
ज्ञाननाले बृहत्कन्दे प्राणायामप्रबोधिते ।
विश्वार्चिषं महावह्निं ज्वलन्तं विश्वतोमुखम् ॥
वैश्वानरं जगद्योनिं शिखातन्विनमीश्वरम् ।
तापयन्तं स्वकं देहमापादतलमस्तकम् ॥
निर्वाते दीपवत्तस्मिन्दीपितं हव्यवाहनम् ।
दृष्ट्वा तस्य शिखामध्ये परमात्मानमक्षरम् ॥
नीलतोयदमध्यस्थविद्युल्लेखेव भासते ।
नीवारशूकवद्तनूपं पीताभं सर्वकारणम् ॥
ज्ञात्वा वैश्वानरं देवं सोऽहमात्मेति या मतिः ।
सगुणेषूत्तमेष्वे (मं ह्ये) तद्ध्यानं योगविदो विदुः ॥
वैश्वानरत्वं संप्राप्य मुक्तिं तेनैव गच्छति " ॥ इति ॥ १ ॥

इदानीमेतद्ध्यानविशुद्धात्मनः सुषुम्नापश्चिममार्गेण षट्चक्रभेदनद्वारोर्ध्वां गतिमाह—

भिन्दन्ति योगिनः सूर्यं योगाभ्यासेन वै पुनः ॥ २ ॥

भिन्दन्तीति । सूर्यं सहस्रदलस्थमधिदैवतमादित्यं च भिन्दन्ति योगाभ्यासेनोपायेन ॥ २ ॥

---

१ क. °र्वातदी° ।

भेदन उपायमाह—

द्वितीयं सुषुम्नाद्वारं परिशुद्धं विसर्पति।
कपालसंपुटं भित्त्वा ततः पश्यन्ति तत्परम् ॥ ३ ॥

इति द्वितीयः खण्डः ॥ २ ॥

द्वितीयमिति। सुषुम्नाया द्वितीयं पश्चिमं परिशुद्धं निर्गुणं विसर्पति प्रविशति मनः। प्रवेशोपायोऽमृतबिन्दावुक्तः। द्वितीयमितिवचनात्सुषुम्नाया द्वौ मार्गाविति लक्ष्यते पूर्वमार्गः पश्चिममार्गश्च। तत्र पूर्वमार्गः प्रवृत्तिविषयः पश्चिमो निवृत्तिविषयोऽत एव परिशुद्धः। उक्तं च स्वात्मारामेण—'पूरयेन्मारुतं दिव्यं सुषुम्नापश्चिमे मुखे' इति। पश्चिममुखस्य योगिमार्गत्वात्पूर्वमुखं कर्ममार्गः। कपालसंपुटं भित्त्वा विदार्याध्यात्मं शिरोऽस्थ्यधिदैवतं ब्रह्माण्डोदरशकलम्। ततस्तदनन्तरं परं पश्यन्ति साक्षात्कुर्वन्ति। तदुक्तं खेचर्याम्—

"मनसा सह वागीश्या भित्त्वा ब्रह्मार्गलं क्षणात्।
परामृतमहाम्भोधौ विश्रान्तिं तत्र कारयेत्" ॥ इति ॥ २ ॥

इति द्वितीयः खण्डः ॥ २ ॥

उक्तयोगासमर्थं प्रति सुगमोपायमाह—

अथ न ध्याययेज्जन्तुरालस्याच्च प्रमादतः।
यदि त्रिकालमावर्तेत्स गच्छेत्परमं पदम् ॥ १ ॥

अथेति। अथशब्दः पक्षान्तरे। न ध्याययेद्ध्यानं ध्यायो ध्यायं कुर्याद्ध्याययेत्। जन्तुर्देही। आलस्यादलसत्वात्प्रमादतो वा यदि ध्यानं न कुर्यात्तर्हि यद्येतद्ग्रन्थरूपं त्रिकालं त्रिसंध्यमावर्तेदावर्तयेत्पठेत्स परमं पदं गच्छेत् ॥ १ ॥

पुण्यमेतत्समासाद्य संक्षेपात्कथितं मया।
लब्धयोगेन बोद्धव्यं प्रसन्नं परमेष्ठिनम् ॥ २ ॥

कथितं मयेति। आचार्यो जातसाक्षात्कारः शिष्यान्प्रति वदति। एतत्पुण्यं पवित्रं योगतत्त्वं मया संक्षेपादविस्तरेण कथितं भवद्भिर्बोद्धव्यम्। कथंभूतेन मया प्रसन्नं परमेष्ठिनं ब्रह्माणं समासाद्य प्राप्य लब्धयोगेन ब्रह्मणः सकाशान्मया योगो लब्ध इत्यृषेर्वाक्यम् ॥ २ ॥

अस्य योगस्य दुष्प्रापतां श्रद्धाजननायाऽऽह—

---

१ क. °द्य समासात्क°।

जन्मान्तरसहस्रेषु यदा नाश्नाति किल्बिषम् ।
तदा पश्यन्ति योगेन संसारच्छेदनं परं
संसारच्छेदनं परमिति ॥ ३ ॥

इति तृतीयः खण्डः ॥ ३ ॥

इत्यथर्ववेदान्तर्गता योगशिखोपनिषत्समाप्ता ॥ २७ ॥

जन्मेति । जन्मान्तरसहस्रेषु तपांसि चरतः पुंसो यदा किल्बिषं नाश्नाति न भक्षयति न अत्ति तदा योगेन परं संसारच्छेदनं ब्रह्म पश्यन्ति ।

तदुक्तम्—" बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः " ॥ इति ।

द्विरुक्तिः समाप्त्यर्थेतिशब्दश्च ॥ ३ ॥

इति तृतीयः खण्डः ॥ ३ ॥

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां दीपिका योगशैखिके ॥ १ ॥

इति श्रीनारायणविरचिताऽथर्वशिखोपनिषद्दीपिका समाप्ता ॥ ३४ ॥